सुदृढ़हस्तकम्” पत्रभङ्गप्रकारः “पत्रन्तु त्रिगुणीकृत्य ऊर्द्धे तु द्विगुणं त्यजेत् । शेषभागे लिखेद्वर्णान् गद्य पद्यादिसंयुतान्” पत्रस्य रचनाक्रमः “राजलेखक माहूय नृपो ब्रूयात् प्रयत्नतः । पत्रं कुरु यथायोग्यं गद्यपद्यादिसंयुतम् । पण्डितद्वयमानीय लेखको र-हसि स्थितः । यथायोग्यानुसारेण पत्रं कुर्य्यान्मनो-रमम् । दिनद्वयं त्रयं वापि विचार्य्य पण्डितेन वै । स्वभ्रान्तेर्दूषणं ज्ञात्वा विलिखेत् पत्रपुस्तके । सामान्य-पत्रे संलिख्य रहसि श्रावयेन्नृपम् । नृपाज्ञया शुभे पत्रे विलिखेद्राजलेखकः” लेखनप्रकारः “अङ्कुशं प्रथमं दद्यान्मङ्गलार्थं विचक्षणः । मध्ये विन्दु समायुक्तमधः सप्ताङ्कसंयुतम् । तदधः स्वस्ति विन्यस्य ततो गद्यं सुशोभनम् । ततः श्रीशब्दरूपाणि पदन्यासक्रमं लिखेत् । भाषया संस्कृतेनापि कुशलं विलिखेत् सुधीः । ततः शुभाशुभां वार्त्तां संस्कृतैः प्राकृतैस्तथा । ततः प्रमाण-सन्देशं ततो वार्त्तां नियोजयेत् । कीर्त्तिप्रीतियुतं पद्यं ततः किमधिकादिकम् । पत्रप्रेषणश्लोकञ्च अब्दमासादि-संयुतम् । सर्वेषामेव पत्रेषु लिखनं चैवमीरितम् । सर्वेषामेव पत्राणां विधिं ज्ञात्वा लिखेत्तु यः । स्वदेशे कीर्त्तिमाप्नोति तथा देशान्तरेष्वपि । एवं शास्त्रक्रमं ज्ञात्वा यो लिखेद्राजपत्रकम् । स राजमन्त्रिभिः सार्द्धं यशः प्राप्नोत्यनुत्तमम् । शास्त्रसन्दर्भमज्ञात्वा यो लिखे-द्राजपत्रकम् । स राजमन्त्रिभिः सार्द्धं दुर्यशो मह-दाप्नुयात्” । पत्रनयनक्रमः । “राजपत्रं नयेन्मूर्द्ध्नि ललाटे पात्रमन्त्रिणाम् । गुरुपत्रं नयेन्मूर्ध्नि ब्रा-ह्मणानां तथैव च । यतिसन्न्यासिनाञ्चैव स्वामिनश्च तथैव च । सादरेणैव यत्नेन तथा मूर्द्धनि धारयेत् । भार्य्यापुत्रस्य मित्रस्य हृदये धारयेत् सुधीः । प्रवीराणां कण्ठदेशे पत्रधारणमीरितम् । एतेषाञ्चैव पत्राणामुक्त-धारणलक्षणम् । अन्येषामपि पत्राणां नियमो नात्र दर्शितः” । पत्रपठनप्रकारः “पत्रं धृत्वा नमस्कृत्य पूर्वाग्रं स्थापयेत् सुधीः । दक्षिणास्यं तु सदसि नृपाग्रे राजलेखकः । पत्रं वितत्य सदसि द्विवारं मनसा पठेत् । स्फुटं पश्चात् प्रवक्तव्यमक्षोभी राजलेखकः । रहसि श्रावयेत् पत्रं शुभं वा यदि वाऽशुभम् । पत्रं श्रुत्वा विदित्वार्थं सभायां श्रावयेत्ततः । रहस्यपत्रं रहसि नृपाग्रे श्रावयेद्द्विजः । अशुभं नैव सदसि शुभं पत्रं नृपाज्ञया । एवं क्रमेण पत्रार्थं श्रावयित्वा द्विजो-त्तमः । नृपतेः सन्निधौ स्थित्वा नृपाज्ञामनुवर्त्तते” । पत्रचिह्नानि “ऊर्द्धे षडङ्गुलं त्यक्त्वा वर्त्तुलं चन्द्र-बिम्बवत् । कस्तूरीकुङ्कुमैः कुर्य्याद्राजपत्रं सुचिह्नितम् । मन्त्रिणां कुङ्कुमेनैव पण्डितस्यैव चन्दनैः । गुरूणां चन्दनेनैव सिन्दूरेणैव स्वामिनः । भार्य्यायाश्चाप्यलक्तेन चन्दनैः पितृपुत्रयोः । सन्न्यासिनां चन्दनेन यतीनां कुङ्कुमेन च । रक्तचन्दनपङ्केन भृत्यस्य समुदीरितम् । शोणितेनैव शत्रूणां पत्रचिह्नं प्रकल्पयेत् । एतेषाञ्चैव सर्वेषां यथायोग्यानुसारतः । पत्रस्योर्द्धे तु मतिमान् कुर्य्यात् चिह्नं सुवर्त्तुलम्” । राजपत्रस्य कोण-च्छेदनप्रकारः “दक्षिणे पत्रकोणस्य अधस्तात् छेदयेत् सुधीः । एकाङ्गुलप्रमाणेन राजपत्रस्य चैव हि” । राजपत्रादेः पदन्यासः “महाराजाधिराजञ्च दान-शौण्डं तथैव च । तथा सच्चरितं योज्यं कल्पवृक्षादिकं न्यसेत् । यथायोग्यानुसारेण तथैव गुणभेदतः । राज-पत्रेषु सर्वेषु पदन्यासक्रमं विदुः” । मन्त्रिपत्रस्य “प्रवरं गुणभेदेन तथा सच्चरितादिकम् । विन्यस्य विलि-खेत् प्राज्ञो मन्त्रिपत्रे पदक्रमम्” । पण्डितस्य “संख्यावद्वन्दितपदं शास्त्रार्थनिपुणादिकम् । पण्डिता-नाञ्च पत्रेषु विलिखेद्वै पदक्रमम्” । गुरुपत्रस्य “सांख्यसिद्धान्तनिपुणं सनमस्कारकं पदम् । विन्यस्य विलिखेत् प्राज्ञो गुरुपत्रे पदक्रमम्” । स्वामि-पत्रस्य “प्रवर्य्यं सनमस्कारं प्राणप्रियादिकं पदम् । विन्यस्य विलिखेद्धीमान् स्वामिपत्रे पदक्रमम्” । भार्य्यायाः “प्राणप्रियापदं साध्वीपदं सच्चरिता-दिकम् । भार्य्यापत्रे लिखेद्विद्वान् पदक्रममनुत्तमम्” । पुत्रस्य “प्राणतुल्यपदं तद्वत्तथा सच्चरितादिकम् । आशीर्वचनसंयुक्तं पुत्रपत्रे पदक्रमम्” । पितृ-पत्रस्य “प्रभुवर्य्यं नमस्कारं तथा सच्चरितादिकम् । विन्यस्य विलिखेत् पुत्रः पितृपत्रे पदक्रमम्” । सन्न्यासिपत्रस्य “सर्ववाञ्छाविनिर्मुक्तं सर्वशास्त्रार्थ-पारगम् । सन्न्यासियतिपत्रेषु विलिखेच्च पदक्रमम्” । सामान्यस्य “सामान्यभृत्यशत्रूणां विनियोज्याश्रुकं प्रति । प्रस्तावघोषितपदं छागतुल्यादिकं तथा । एतेषा-मेव पत्रेषु यथायोग्यानुसारतः । विन्यस्य विलिखेत् प्राज्ञः पदक्रममनुत्तमम्” । श्रीशब्दविन्याससंख्या यथा “षड्गुरोः स्वामिनः पञ्च द्वे भृत्ये चतुरो रिपौ । श्रीशब्दानां त्रयं मित्रे एकैकं पुत्रभार्य्ययोः” पत्रकौ० ।